अमूलायामित्यनेनैवसाकंवाशाहृस्यसंबंधात् अमूलायांनाराचो वाशाहृतत्रार्थोसिद्धोयांनअमूलायांमू
लरहितायांमूलाभिधयत्ररहितायां मूलाभिधनक्षत्रजन्मजनितदोषरहितायांमूलाभिधनक्षत्रजन्मजनित
दोषनिर्हरणक्षमायांवा ज्येष्ठधांशान्तसंत्याकोष्ठ्यांशत्रवोयांकृत्वायंवल्गांवाचक्रुस्तेपुनःप्रतिहराहरामी
त्यस्यार्थः प्रकाशनीयोबालैः प्रतख्याख्यानेअमूलायामित्यत्रअग्निरौणपाहृत्नेराश्रयणं अथोमत्राहेर्वस
हेयजमानतेनवसंबंधिनिदेवेशत्रवोयांकृत्वाचक्रुस्तांपुनःप्रतिहरामीत्यन्वयः नाराचोबाणजातोकृत्या
करणंतस्याः शत्रुहननसामर्थ्याभावार्थं द्वितीयव्याख्यानेअमूलायांशान्तोषध्यांकृत्याकरणंतस्याः मूल
जनितदोषनिर्हरणसमर्थ्यार्थं देवेकृत्याकरणंसस्याघनिष्पत्त्यर्थं इति ४ यांतेचक्रुर्गार्हपत्येपूर्वाग्नाउत
डश्चितः शालायांकृत्यायांवक्रुः पुनःप्रतिहरामितां इति ५ उडाश्चितः उः उहंभावं वितयांतिनेडाश्चितः उ

हभावर्वेतत्रत्यर्थः यद्वा ङः ङः त्वं परस्पदातव्यमितिपैवितयंतितेङश्चितः अथवा ङः ङष्टांकृत्यांपरवप्मर्ययेपवि
ॐ. तयेतिङैतेश्चितः अपिवा त्रिषापिवितयंतीमत्रमेविन्वेतिसेविन्वेतितेङश्चितः विमृवयते तेशात्रयः गार्हपत्ये
२२ प्रसिद्धेअपराग्नौयोक्रुत्यांवक्रुस्तोपुनः प्रतिहरामीति गार्हपत्यशब्देनवअपराग्नितविशेषात्दक्षिणाग्निरपि
लक्ष्यते तेननैतद्दक्षिणाग्नावपियांकृत्यांवक्रुस्तांपुनःप्रतिहरामीतिसिद्धेङतअपिच ङश्चितःप्राग्वत् तेषा
त्रयः पूर्वाग्नौआहवनीयेयांकृत्यांवक्रुस्तांपुनःप्रतिहरामीति पूर्वाग्निशब्देनवादक्षिणाग्निर्लक्षणीयः तस्य
स्यदक्षिणाग्नेर्गार्हपत्यादाग्नेयकोणेगार्हपत्याहवनीययोरंतरालेषोडशमध्यावितिपदेपातात् आग्नेयको
णस्यचपूर्वदक्षिणयोरुभयोर्दिशोर्मध्येविद्यमानत्वात् पूर्वत्वमपिलाघटीत्येवंततश्चपूर्वाग्निशब्देनापिद।
दक्षिणाग्निः सर्वेनलक्षयितशक्यइतिवाक्षैः सर्वेनप्रतिपत्तव्यं तेनाग्नित्रयेपिकृत्याप्रतिहरणेप्रयोक्तव्यं शा।
लाशब्देनशालास्थिताअपासनाग्निर्लक्ष्यते अपासनाग्नेः शालाग्निपदवाच्यत्वस्यसर्वत्रप्रसिद्धत्वात् तेननै।
शालायांङतङश्चितःप्राग्वत् किंच सभ्यावसथ्ययोराधानपक्षेपूर्वाग्निशब्देनैवसभ्यावसथ्यावप्युपलक्षणी
यौ सभ्यावसथ्ययोराहवनीयाद्विहारत्वेनवमादिस्पलेपुतयोः साहचर्यस्पष्टत्वात् तयोश्चआहवनीयात्तस्य २२

वैस्यामेव दिशि आधानस्य विहितत्वात् तेन तयोराधानपदेशः वा अग्निशब्देनैव आहवनीयो ग्राह्यः स्वस्य यान्ता
अग्नित्रयं लक्ष्यते तेन पंचस्वपि अग्नौ तेषु अग्निषु कृतस्यानिवारणं प्रत्येतव्यं अथ यस्मान्नैव ग्रौउत्तरार्द्धं चैव न तदाह तथाहि शा
लायां ते अपामसने अग्नौ यो कृतं यो वक्र स्तो पुनः प्रतिहरामीति अग्निषु सर्वत्र कृतस्याकरणं स्वगोयजनक्रतार्थे
इति ५ यो ते वक्रः सभायां यो वक्र राष्ट्रदेवने यद्देषु कृतं यो वक्रः पुनः प्रतिहरामितो इति ८ उत्तङ्गाश्रितः
इति पदद्वयमनुवर्तनीयं उत्तङ्गाश्रितः ते सभायां सह भासंते उपविष्टा विद्वज्जना अत्रेत्यधिकरणव्युत्पत्त्या सभा
शब्देन विद्वज्जनाध्ययनाध्यापनशालोच्यते तेन च सभाशब्देन सभायां स्थितः सभ्याग्निर्लक्ष्यते यथ एष सभाया
मग्निरिति श्रातपथश्रुतेः तेन ते सभायां सभ्ये अग्नौ यो कृतं यो वक्र स्तो पुनः प्रतिहरामीति तथा तत्र सभायां सभ्य
स्यायनशालायां ते अपि दैवतेन तत्र क्रियमाणे ते कृते यो कृतं यो वक्र स्तो पुनः प्रतिहरामीति अपि च तेत्र
देषु प्रसिद्धेषु तेन तत्र भूतस्यायनेषु यो कृतं यो वक्र स्तो पुनः प्रतिहरामीति अत्रापि सर्वत्र कृतस्याकरणं तत्र कार्यं
नाशार्थे इति ९ यो ते वक्रः सेनायां यो वक्र विघ्नापुये डडभौकृतं यो वक्रः पुनः प्रतिहरामितो इति १०
ते नवसेनायां इनेन ईश्वरेण स्वामिना सहितायां वनरंगवाहिन्यां यो कृतं यो वक्र स्तो पुनः प्रतिहरामीति तथा

उ॰ तेश्वामुखे इषुशब्देनबाणः तल्लक्षणोश्वामुखे श्वामुखमात्रोपलक्षणमेतत् तेनतेनवडवामुखमात्रे शत्रुवायोक्त्यां
वह्निस्तांपुनः प्रतिहरामीति तथा तेडेडभौ डुडुंभश्चवमाकारकशब्दकारिणि बहुदेशभाषया दमामो इतिप्र
२२ सिद्धे कृत्यो यावन्नकृस्तांपुनः प्रतिहरामीति डुंडुभिरितिशब्दानुकरणं डुमोभिन्न इतिवाडंडभ्यतेवांस्यादृयकर्म
णउत्तियास्कः इति ७ यांतेकृत्यांकूपेवेदधुः श्मशानेवानिचख्नुः सद्मनिकृत्यांयावकृत्पुनः प्रतिहरामिता
इति ८ तेकूपेप्रसिद्धे यांकृत्यांअवदधुः अधः उदकमध्ये स्थापयामासुः तांपुनः प्रतिहरामीति कूपशब्देनव
वापीतडागाद्युदकालयमात्रंलक्ष्यते तेनतत्रापिकृत्यानिवारणप्रसेतव्यं तथा तेश्मशानेवामनुष्यदहनस्था
नेप्रसिद्धेवाशत्रवोयांकृत्यांनिचख्नुः खनअवदारणे अवदारणेनवागर्त्तंकृत्वातत्रकृत्यांमनुष्याकारपुत्तलि
कांकृत्वासत्रगर्त्तेनिखायमृत्तिकादिनाअतिहच्छन्नंरक्षयामासुः तांकृत्यांपुनः प्रतिहरामीति अपिच तेस
द्मनिगृहेयांकृत्यांशत्रवश्चक्रुः तांपुनः प्रतिहरामीति अत्रकूपाद्युदकालयेपुरुकृत्यावधमनेउदकनाशार्थं
उदकपानादिनाशत्रुवधार्थंवा श्मशानेकृत्यानिखननंतेषांप्रतिकृत्याकरणंतस्यप्राणिमात्रस्यमरणेनश्मशा
नभस्मीभावेअपिसेवयनार्थमिति भावः सद्मनिकृत्याकरणंगृहाणांगृहेषुवर्त्तमानानांसर्वेषाममपिपदार्थानां २३

वथार्थमितिभावः इति ८ यांतेचक्रुः पुरुषास्थेअग्नौसंकसुकेचयां म्रोकेनिर्दाहेक्रव्यादे पुनः प्रतिहरामितां
इति ९ तेनचपुरुषास्थेपुरुषास्थिनि जात्यभिप्रायेणैकवचनं पुरुषास्थिषु पुरुषाणांपौरुषेयेनानांअति
पराक्रमवतापरमप्रेमास्पदानांपुत्रादीनामस्थिषु श्मशानेवोयांकृत्यांराजयक्ष्मादिरोगनिदानभूतांचक्रुस्तांपुन
प्रतिहरामीति तथा तेनचसंकसुकेचअग्नौसंकसतिसंगच्छतेस्वाश्रयेणजठरेणसार्कंस्वयमाश्रितः सन्नि
तिसंकसुकःशरीरेनजठरवह्नी तस्मिन्संकसुकेजाठरेअग्नौशत्रवोयांकृत्यांअग्निमान्द्यरूपांचक्रुस्तांपुनः प्रति
हरामीति वर्तते अयते लोटते लोठते स्पदाति कसतिसर्पेति इतिगतिकर्मसुकसतिः पठितः तेनच
योक्तव्यार्थः अथसंकसुकस्याग्नेः कृत्याजनितानांयमाग्नीनांम्रोकेनिर्दाहेक्रव्यादमितितृतीयपादेतत्त्रया
णामपिप्रतिहरणमाह तथाहि संकसुकेअग्नौजाठरेअग्नौम्रोकेकृत्याजनितेम्रोकेविण्मूत्रयोर्मोचनेअती
सारादिरोगनिदानभूतंआग्नेयंमेपुनः प्रतिहरामि तथा निर्दाहेनिश्चितोदाहः निर्दाहः अतिदाहः सर्वेषांगा
त्राणांभस्मसाभावः तेननिर्दाहेसंकसुकस्याग्नेर्द्वितीयेधर्मेकृत्याजनितेपुनः प्रतिहरामि तथा क्रव्यादम्
भावप्रधानोनिर्देशः क्रव्यंमांसंअत्तिभक्षयतीतिक्रव्यात्तत्क्रव्यादेक्रव्यात्वमित्यर्थः तेक्रव्यादेक्रव्यात्वेमां

सभवत्कतंसंकसकस्यामेस्तुतीयं यमेंकृत्वाजनितेष्वनः प्रतिहरसमीति इति ९ अपथेनाजभावेनानापथेतः प्र
उं. हिएमसि अधीरोमर्याधारेभ्यः सेननभाराचिना इति १० अपथेननपेथाः इति अपथ्यंतेन अपथेन अमार्गेणवे
२७ दविहद्वेनजहारमांप्रतिग्राभिमुखेन हृतवान् मम गृहेआनीतवानित्यर्थः तोपरकृतोकृत्वापथ्यामार्गेणवेद
विहितेनमार्गेणकृत्वाप्रतिहरणस्तकगणपाठादिविध्यनमार्गेणेतियावत् तेनमार्गेणकृत्वा इतोमन्त्रः प्रहि
एमसि प्रहिएमः हृदीकुर्मः कथंकृत्वाहृदीकरिष्यसीतिमत्वाउत्तराद्धेनतदेवविशदयति तथाहि अहंअधीरः
नधीरः अधीरः कृत्वयाभीतः सन् मर्याधीरेभ्यः मरणंमर्या तत्रप्रकृताकृत्वामरणंज्ञेयं तस्यांमर्यायांकृत्वा
मरणेकृत्वानाशनेधीरेभ्यः अभीतेभ्यः कृत्वानिर्हरणस्तकगणेभ्योहेतुभ्यः अविसाश्रवनेनरक्षणेनस्वीयेनकृ
तातांकृत्वामांसेजभारसेजहारसेहृतवानासि यतः इति ११ यस्यकारनशाशाककर्णेशाश्रेपादमंगुरिं वकारमहम
स्मस्मसमगोभगावद्भ्यः इति १२ यः शाग्र्यः वकारकृत्वामित्यार्थात् सकर्णेतोकृत्वाकर्णेनशशाक शङ्कसामर्थ्ये
समर्थोनवभूव यतः सकृत्वाकर्णेयादंमदीयेवरणेशाश्रेश्रितवान्सेवितवान् किंव अंगुरिं अंगुलिंपादीव
यवमपिशाश्रेप्रारवत् अतएव सः अस्मभ्यंसपरिवारेभ्यः भगवद्भ्यः कृत्वाप्रतिहरणस्तकगणपाठेनकृताभा २७

गपगुक्तेभ्यः स्वर्येश्रभगाः भगरहिताः भाग्यरहिताः सन् भद्रं मंगलमेव चकार अर्थात्स्वस्य अभद्रं चकारेति सिद्धम् इति ११
कृत्याकृतेन कृत्वलगिनेमालिनेशापथेय्ये इंद्रस्त्रेहेत महता वधेनाग्रिविंध्यास्तया इति १२ कृत्याकृते कृत्याकारिणा व
लगितम् वलगो विधते यस्या सौ वलगी तेन वलगिनेवलगवंते कृत्याविशेषकारिणे वक्कुरमूलापामित्यत्रवलग
शब्दो व्याख्यातः मूलिनेमूलवंतेनाकालिकशत्रुहननसमर्थानेकमूलज्ञानवंते शापथेय्ये अहमेनं हनिष्यामि
वनवेश्यर्थेमरिष्यामि अस्मिन्नर्थेममगुर्वादीनां शपथ्याः एवं शापथेकर्तृ येभ्यः शापथेय्याः तेषु शपथेय्यं अवथ्यशप
थेइंद्रशं कृत्याकारिणं इंद्रो महता वधेन हंतु वधेन वज्रेण हंतु तथा अग्निः अस्तपाश्वलेष्टहं यानीयस्त्वा अस्त्रगः शृ
हृगतः गार्हपत्यादिरूपः तेम महता वधेन विध्यतु इति १२ इति यांते चकुरिति द्वादशर्चं सूक्तं व्याख्यातम् इति श्रीदिवे
दश्रीश्रीपतिकनिष्ठतनयावासुदेवविरचितायां कृत्यानिर्हरणसूक्ताणव्याख्यायां बालबोधविवेकिन्यां यांते च
क्रुरिति द्वादशर्चं सूक्तव्याख्याने समाप्तम् ७ अथ कृमप्रामेषु प्रतीचीनफल इति त्वं सूक्तं व्याख्यायते तत्र प्रती
चीनफल इति तृचं शुक्रोऽपामार्गवीरुद्देवतमानुष्टुभमनेनमंत्रोक्तां देवतां डरितापमृष्टिमपार्थयंदित्यनुक्रम
णिका तत्राद्यातावत् प्रतीचीनफलो हि त्वमपामार्गरुरोहिथ सर्वान्मच्छपथाँ अधिवरीयो यावयाइतः इति १

ॐ·
२५

उपसृकप्रत्यङ्हि संबभूविथप्रतीचीनफलस्त्वं सर्वान्मच्छपथाँअधिवरीयोयावयावधं इत्येतयाईशानांत्वेतित
तृतीयस्यउतोअसीत्यस्यसूक्तस्यसमम्पाव्याख्यातयायद्यपिप्रायेणगतार्थंतथापिव्याख्यायते तत्रयवयेतियौतिर्मिश्र
णार्थः अत्रतुयवयाइति यौतिरमिश्रणार्थः इतिविशेषः यौतेस्तुमिश्रणामिश्रणार्थत्वात् उभयत्रापियथा
व्याख्यातोऽर्थस्तथोपपद्यते हेअपामार्गअपमार्जयति दूरीकरोतिपरकृतोपकृत्यामित्यपामार्गः सकण्टकदलैर्हतः
सञ्जीवान्अवतप्यपर्यटादिसाधनभूतः क्षारः तेषामपिविशेषः प्रसिद्धः तस्यसंबोधनेहेअपामार्गहियतः निश्चितेवात्र
प्रतीचीनफलः अनिशायितकण्टकसंयुतत्वादसि अतः परकृतकृत्यायाअपिप्रतीचीनफलः विपरीतफलदोभू
त्वारुरोहिथप्रादुर्बभूविथप्रादुर्भूतोऽसि अतएवसर्वान्सकलान्शापयेयान्परकृतान्मद्विषयकान्शपथान्
अपेयाज्ञः कृत्याकृत्वामयाअपेवप्रयोक्तव्यः इत्येवमादिप्रतिज्ञारूपान्वरीयोवरतरंउरुतरंवायथास्यात्तथा व
रीयोवरतरमुरुतरंवेतियास्कः अपिईश्वरीभूत्वाअपिरीश्वरइतियतः पाणिनिः स्मसार् इतोमन्त्रः अस्मात्म
द्वेषणात्जनात्यवयाः दूरीकुर्याः इतिशार्वयेहं इति १ यद्दुःष्वप्न्यंयच्छमलंयद्वाचेरिमपापया त्वयातद्वि
श्वतोमुखापामार्गापमृज्महे इति १ यत् वाचेरिम इतिपदानि हेविश्वतोमुखअपामार्गविश्वतः सर्वतः स २५

वीरुत्स्वपि दिव्यमुखोनिशाखाप्रशाखाप्रशाखाद्रूपाणि यस्यासौ विश्वतोमुखः तस्मात् संबोधने हे विश्वतोमुख ईदृश
हे अपामार्ग भगवन् त्वं येषां यापाप्यायापकृत्याकृत्यायातुधानाः तेडः खेडः खेजनके कृते जनिते तत्वादि तेडः खेदं
वैरिमगाक्षेम शापयाम त्वमाग्निमदनएषोः येगात्मर्थानिप्राप्यथो इति वशामनान् तयाकृतयाकृत्यया तेन तडः
स्मृते डः खेदं हे अपामार्ग तव प्रसादात् अपमृज्महे दूरी कुर्मः नाशयामः अपस्तवौ मृजिनो शार्थः प्रत्ययेन तयः अन्यच्च
हे विश्वतोमुखोपामार्ग त्वं यद्वा अथवा यथा पापया याथवा मलं शासस्व सम्मलं मलरूपं शत्रुभूतं खेडः खेडः अत
जनिते वैरिमतया पापया तव मलं खेडः अपमृज्महे भगवत्सर्वं इति २ शपावेदनाज्ञानाखिनावेडेन यत्वसंतानिम
अपामार्गे तया मलं तपसा वेनदपमृज्महे इति ३ हे अपामार्ग शपा वदता शपाः इति शपामादेनायस्यासौ शपावद
न्तेन शपावदता इति शपा मदेतेन ईदृशेन कृता खिना कृत्सिता निखानि विधेयस्यासौ कृतत्वीतेन कृतखि
ना इति कृत्सितगले त्वाखवना इत्यभूतेन पंडेन षष्ठ रहितेन पर कृत कृत्या जनितेन डः मृता भियेन डः ईदृशेन पापे
न सहयद्वयं आसि मास्थिताः तस्मात् तवैव यन्तया अपमृज्महे इति भगवन् यः शुद्धः पिंगादो वालिना निलका व
लो विलि षः खेडो षेडः खेलतिस्नमदायनदीयत्वधेनमदकैभिप्रगाह्य यदासीदकेमुखमासंदेतायास्मा अ

षष्ठेसूक्तेदन्यस्यातेदनिजह्येतिभ्रूणहत्यायैस्वाहेत्यथतेनिःषेधंतिनिषिद्धपाप्मानोपयामाभावेनेतिपापस्वरूपेशंगावा
उ॰ यनसूत्रायभिहितेप्रसिद्धे इति २ इतिप्रतीचीनफलोहितमितितृचेसूक्तेव्याख्याते इतिश्रीद्विवेदश्रीश्रीपतिक
२९ निष्ठतनयवासुदेवविरचितायांकृत्यानिर्हरणसूक्तगणव्याख्यायांबालबोधविवेकिन्यांप्रतीचीनफलोहितमि
तितृचसूक्तव्याख्यानेसमाप्तम् ८ अथक्रमप्राप्तेमयप्रतिसरइत्यर्थसूक्ताभिधेयकेकेदशर्चेद्वादशर्चेवमिलिताद्वा
विंशकेसूक्तद्वयेव्याख्यायते तत्र अयंप्रतिसरइतिद्वाविंशकेसूक्ते कृत्याद्रूषणदेवत्यमन्तमंत्रोक्तदेवत्यमानुष्टुभमाद्यो
परिष्टाद्बृहतीद्वितीयात्रिपाद्विराड्गायत्र्यन्तेनेदइतिचतुष्पाद्विराड्जगतीतदग्निरितिसंस्तारपंक्तिर्भूरिगेतदंयद्इतस्यपरिष्टा
द्बृहतीयेस्वाक्त्वमितिद्वेककुम्मत्यायाःकृत्याइतिचतुष्पात्पुरस्कृतिर्जगत्यस्मैमणिमितित्रिष्टुबुन्नमोऽग्रसीतिपथ्यापं
क्तिःकश्यपस्त्वेतित्र्यवसानाषट्पदाजगतीयस्त्वाकृत्याभिरितिपुरस्ताद्बृहत्यैंद्राग्नेवमेतिगर्भात्रिष्टुब्वामाहृत्यदितिवि
राड्गर्भाप्रस्तारपंक्तिरस्मिंत्रिद्वइतिपराविराट्त्रिष्टुप्पुरस्तात्निदाविशत्मिज्यवंसानानामष्टपाद्विराड्गर्भाभूरिक्शक्वरीति
त्यवक्रमणिकातत्रायस्यायातावत् अयंप्रतिसरोमणिर्वीरोवीरायबध्यते वीर्यवान्त्सपत्नहाशूरवीरःपरिपाणः
सुमंगलः इति १ अयंप्रतिसरःप्रत्यन्तः वीरःविशेषेणईरयतिप्रेरयतिदूरेक्षिपतिशत्रूनितिवीरः अनएव वी २९

र्यवान् पराक्रमवान्शत्रुहननसामर्थ्योपेतः अतएव सपत्नहा सपत्नान् शत्रून् हंतीति सपत्नहा सकलशत्रुहं
ता अतएव सुवीरः सुराः शौर्योपेताः वीराः पुत्रादयो यस्माद्धारकादसौ सुवीरः अतएव परिपानः परितः सर्वतः सर्वे
षु देशेषु सर्वेषु कालेषु सर्वानपि पुत्रादीन्पाति पालयति बद्धः सन्निति परिपानः अतएव सुमंगलः सुष्ठु मंगल
मंगलरूपः यद्वा सुष्ठु मंगलानि विवाहादीनि यस्माद्धारकात्प्रतिबद्धानि भवेति असौ सुमंगलः ईदृशः प्रतिसरः बद्धः
सन्प्रतिशत्रून्अभिमुखतयार्थं सरति गच्छतीति प्रतिसरः प्रतिसरशब्दवाच्यः मणिः श्रीहियवादिः सर्वविधेपि वीराय
पुत्रादये कृत्याप्रतिहरणार्थं बद्धा नेकृत्याप्रतिहरणमंत्रेणानेना इति १ अयं मणिः सपत्नहा सुवीरः सहस्वान्
वाजी सहमान उग्रः प्रत्यक्कृत्या दूषयन्नेति वीरः इति २ अयं वीरः सपत्नहा प्राग्वत् सहस्वान् सहो विद्यते यस्यासौ स
हस्वान् बलवान् सहः यः वयः वर्गः इति बलनामसु पाठात् वाजी वाजो वेगो विद्यते यस्यासौ वाजी वेगवान् वाजी
वेजनवानिति यास्कः सहमानः सहते अभिभवति शत्रूनिति सहमानः उग्रः उद्गूर्णः अतितेजस्वी सुवीरः शोभ
ना वीरा यस्माद्धारकादिति सुवीरः प्रत्यक् प्रतिशत्रून् अभिमुखमेव वर्तते इति प्रत्यक् ईदृशः मणिः कृत्याः परकृताः कृत्या
दूषयन्नेति अस्मान् अभिवेधनार्थम् इति शेषः इति २ अनेनेंद्रो मणिना वृत्रमहन् अनेना सुरान् पराभावयन् मनीषी

अनेनाजयद्यावापृथिवीउभेइतिमेअनेनाजयत्त्वादिशश्चतस्रः इति ३ इंद्रः ऐश्वर्योपेतः प्रसिद्धोदेवराजः अन्वेना
ॐ मणिनाबद्धेनहत्वेनसशत्रुंअहनत्हतवान् वृत्रोवृणोतेर्वावर्त्तते वीवर्द्धतेर्वेत्यादियास्कः सएवेंद्रः मनीषीम
२७ मनीषाविद्यतेयस्यासोमनीषीमेधावान् मनीषी मेधती विपा तामनश्चित् इति मेधाविनामसु
पाठात् अनेनबद्धेनमणिनाअसुरान् असंतिक्षिपंतिशत्रुभूतान्देवानितिअसुरादैत्याः तानसुरान्दैत्यानप
राभावयत् पराभूतवान्पराभवप्रापितवान् अनेनइमेअतिप्रसिद्धेउभेअपिद्यावापृथिवीअद्यावापृथि
व्यौअजयत्जितवान् अनेनचतस्रोपिप्रदिशःदिशोविदिशश्चाजयत् परस्परंहेतुहेतुमद्भावः सर्वत्रबोद्ध
व्यः प्रतिपदंकियद्वालेख्यं अतिस्पष्टत्वात् इति ३ अयंस्राक्त्योमणिः प्रतीवर्त्तः प्रतिसरः ओजस्वान्विमृधोव
शीसोअस्मान्गोत्वसर्वतः इति ४ अयंयः ओजस्वान्बलवान्शत्रुहननसमर्थोबालोयेतः ओजः पाजः श
वः तवः तरः त्वक्षः इतिबलेनामसुपाठात् अतएवविमृधः विशेषेणमृध्यंतेहिंस्यंतेप्राणिनोयेनबद्धेनस
तिविमृधः यद्वा विमृधःविगतोमृधः संग्रामोयस्मात्बद्धात्असौविमृधः यस्मिन्बद्धमात्रेहिशत्रवः पला
यंतेभीताः संतःतेनमृधः संग्रामःकैः साकंकर्त्तव्यइतिमत्वा मृधः अमर्द्दंतासौमपेयायदेवा मिद्धोनपात् २७

मम्नुप्रमित्यादौमृपिर्हिंसार्थइतिस्कंदस्वामिभाष्ये तत्रपूर्ववत् किंशाशास्तु हिंस्येतेहितत्रप्राणिनः अयम
तःस्तमत्वमास्मृपस्कः विनत्र्यंद्रमृध्येजहीतितिनिगमो इतिनिघंटुभाष्ये अतएवचवशीस्वाधीनवृत्तिः स्वाम्यः
स्वाक्विषुगृहकोणेषुभवः स्वाम्यः कृत्याकारिभिरस्मदीयः गृहकोणेषुनिखातइत्यर्थः ईदृशोयःप्रतिवर्त्नैः
येप्रतिकृत्याकृतानेप्रतिवर्त्नेतेअसौप्रतिवर्त्नैः अतएवप्रतिसरःप्रागवत् उत्कृम्नतोयोमाणिरस्माभिर्बद्धः तत
उप्सायकंठादौषद्धःकृत्यानिर्हरणस्तकगणप्रयोगेणप्रतिषद्धशक्तिकोवाकृतःसोस्मान्नसर्वतःपातु इति ४
तदग्निराहतदुसोमआहबृहस्पतिःसविताततदिंद्रः तेमेदेवाःपुरोहिताःप्रतीचीःकृत्याःप्रतिसरैरजंतु इति ५
तेकृत्यानिर्हरणकारिणोयेदेवाः अग्न्यादयःप्रसिद्धाःपुरोहिताःपुरःपूर्वमेवप्रार्थनायाहितेयेभ्यस्तेपुरो
हिताःप्रार्थनांविनेवहितकारिणइत्यर्थः तेप्रतीचीः प्रतिप्रातिकूल्येनकृत्याकर्तॄः अंचंतिगच्छंतिताः प्र
तीच्यः ताः प्रतीचीःपरकृताःकृत्याःकमप्युताःप्रतिसरैर्मणिभिरस्माभिर्बद्धैः निरजंतुदूरेक्षिपंतु इत्यहमे
वकेवलंब्रवीमिअग्निः सवितेति न किंतु तदग्निराहमयोच्यमानंतदग्निरप्याह उअपिच सोमस्तदाह
अग्नेरपिउत्तत्तआहइत्यनुवर्त्तनीयं तथैवचयोज्यतेस्माभिः उअपिच बृहस्पतिस्तदाह उपिंद्रश्चसवितातदाह

सर्वस्यप्रसवितासूर्योपितदाह तदिंद्रःअग्न्यउग्रमाह इतिपदद्वयमेवानुवर्त्तनीयंतत्पदस्यवर्त्तमानत्वात् उग्रपिव
ॐ इंद्रसकलैश्वर्योपेतःसकलदेवराजस्तदाह इति ५ अग्नेतद्दयेद्यावापृथिवीउताहरुतसूर्योतेमेदेवाःपुरोहिताः
२८ प्रतीचीःकृत्याःप्रतिसरैरजंतु ६ अहेद्यावापृथिवीद्यावत्पृथिव्यौद्युलोकपृथिवीलोकौकर्मभूतौ अग्नेतः अं
तरामध्येममपरकृतानांकृत्याशेवमध्येव्यवधायकत्वेनममकृत्याभिःसहसंबंधमभावार्थंदयेस्थापयामि
उग्रमग्रपिवाअग्रहःदिवमेअग्रहरभिमानिनेदेवविशेषेअग्नेतद्दधे उतमग्रपिव सूर्यमग्नेतद्दयेप्रावत् तेमेदेवाइत्या
दिप्रावत् इति ७ येस्थानंवमणिंजनावर्माणिकृणवते सूर्यइवदिवमाहस्वविकृत्यावाधयतेवशी इति ८
येजनाःस्वाक्षंमणिं अयंस्वाक्षोमणिरित्यव्याख्याते कर्मभूतेवर्माणिपरैःशरीरोपरिविधार्थंप्रदिषाः
माणवाणधाद्युपनिवारकलोहादिनिर्मितसन्नाहरूपंकृणवतेकुर्वते तेजनाःकृत्याःपरकृताःकर्मभूता :
वशीवशिनःस्वाधीनाभूत्वाविवाधतेविशेषेणवाधंते वशी वाधते इत्युभयत्रैकवचनेबहुवचनस्थानेदृष्ट
व्यंजनानांविशेषणत्वात् कइव दिवंस्वर्गंद्युलोकंआहस्वबशीस्वाधीनहस्तिसूर्यइव यथादिवमाहस्तंसूर्यःकृ
त्याहूपाणिनमांसिविशेषेणबाधते तद्वदित्यर्थः लिंगसंख्याविभेदेपिउपमानोपमेयता विभक्तिःपुनरेकैवउप २८

मानोपमेययोः इति दृष्टं तदार्ष्टान्तिकयोः एकवचनबहुवचनरूपभेदेपि दूषणाभावो ज्ञातव्यः अतएव दृष्टां
नाभिप्रायेणैव वक्षी बाधते अस्तूभयत्र श्रुतावेकवचनेन श्रुते अतएव दार्ष्टान्तिके बहुवचनेन व्याख्यातो वि
परिणामोप्युपपद्यतेतरा इति ७ स्राक्त्येन मणिना ऋषिणेव मनीषिणा अजैषं सर्वाः पृतना वि मृधो हा
न्मि रक्षसः ८ अहं स्राक्त्येन मणिना व्याख्यातेन सर्वाः पृतनाः संग्रामान् अजैषं जितवानस्मि केनेव
मनीषिणा मेधाविना ऋषिणा इव शुक्रेणेव इति शुक्रोक्ते तपोबलतत्कल्पातरीणां मनीषिणां अन्यं शुक्रा
भिध ऋषिर्दृष्टा इति ज्ञातव्यं किंच मृधः मृधिर्हिंसार्थ इति लिखिते तेन मृध्यो हिंसकान् रक्षसः राक्षसान् स्रा
क्त्येन मणिना विहन्मि विशेषेण हन्मि इति अत्रापि केनेव मनीषिणा ऋषिणेव इति दृष्टान्तो ज्ञातव्यः इ
ति ९ याः कृत्या आंगिरसीर्याः कृत्या आसुरीर्याः कृत्याः स्वयंकृता या उ चान्येभिराभृताः उभयीस्ताः परा यन्तु
परावतो नवतिं नाव्या अति ९ याः कृत्याः आंगिरसीः आंगिरस्यः आग्नेय्यः अंगिरा उह्याग्निरिति श्रुतेः अ
ग्निसेविभ्यः अग्न्यादिसर्वदेवसेविभ्यः दैत्यकृता अग्निः सर्वा देवता इति श्रुतेः देवकृता इत्यर्थः तथा याः
कृत्याः आसुरीः आसुर्यः दैत्यसेविभ्यः दैत्यकृता इत्यर्थः ता उभयीः उभय्यः उभयविधा अपि कृत्याः कर्तृम

तानाव्याः नावातार्याः नाव्याः नौकातार्याः नदीः कर्मभृताः नवतिं नवशतानि तथा नवनवतिः नवनवत्यधिका
ओं. २९ नि नवशतानि ९९९ एकेन नवतिशब्देन लक्ष्यंते नवपदस्य नवतिं विभोगात् नवनवतीनाव्याः प्रतानि इत्ये
वमादिश्रुतिषु अस्यार्थस्य दर्शनात् परावतः अतिदूरवर्त्तिनीः आके पराके परावैः आरे परावते इति दूरस्य
इति दूरनामसु पाठात् तेन अतिदूरवर्त्तिनीः नौकातार्याः नदीः नवतिशब्दोपलक्षिताः ९९९ नवनवत्यधि
कानि नवशतानि अति अतिक्रम्य परायेत्वपलायेन तथा याः कृत्याः स्वयंकृताः स्वयमेव परद्वषीर्घ्येकृताः परैः
कृत्यानिर्हरणसूक्तगणप्रयोगेण स्वेषुवानीयस्थापिताः याउचयाअपि वकृत्याः अन्येभिः अन्यैः स्वातिरिक्त
जनैः आभृताः आहृताः ताउभयीः परावतो नवतिं नाव्या अतिपरायेंत इति प्राग्वत् अस्मिन्महत्यर्णवे अंतरिक्षा
ई इंद्रो विष्णुः सविता रुद्रो अग्निः प्रजापतिः परमेष्ठी विराड्वैश्वानरः ऋषयश्च सर्वे इति १ इंद्रः विष्णुः सविता रु
द्रः अग्निः परमेष्ठी परमे अत्युत्कृष्टे स्थाने ब्रह्मलोके तिष्ठतीति परमेष्ठी ईदृशः विराट् विशेषेण स्वाधिकरणा
र्थे राजते शोभते असौ विराट् हिरण्यगर्भस्वरूपः इति विशेषेण द्वयविशिष्टः प्रजापतिः प्रजानां पालको ब्रह्मा
वैश्वानरः वैश्वानरः कस्माद्धि स्थावराज्ञयति विश्वमेनेन नरान्नयंतीति वापि वा विश्वानर एव स्वार्थात्प्रत्ययतः सर्वाणि भू २९

नानितस्य वैश्वानर इति निर्वचननिरुक्तः वैश्वानरपदाभिधेयः अग्नेरेव मूर्तिभेदः सर्वे ऋषयश्च वसिष्ठविश्वामि-
त्राद्याः अस्मै यं प्रतिकृत्याहुतानस्मै मणिं व्रीहियवादिरूपं दमेकवचं धारयत नव अनुष्याति प्रार्थयामो वयं इति ११ ५
उनमो अस्तोष धीनामनड्वान गतानामिव यात्रः श्वपदामिव यमैच्छा याविदामते प्रतिस्पाशनमेतिनं इति १२
अत्र सर्वत्र सूक्तेऽस्मिन् शाहो मणेर्विशेषणानि ज्ञातव्यः सहस्राक्षो भवतीत्यादिषु अग्रेतनीषु ऋक्षु योऽविभक्तो सेमणिरु
त्याद्यभिधानात् तेन अस्मा भाधायामप्यृचि मणिरेवाभिधेयः सच व्रीहियवादिरूपः सर्वविधः साप्यश्वरणोपि
गृहीतेशकुन्हन्यापि व्रीहियवरूपपण्यग्राह्यः आख्यानन्तयवातिसम्पतमोयद्यपि भवेत्तथापि बालबोधार्थं
विशदतयैतावाहविवितां अस्य व्याख्या हे व्रीहियवरूपमणे इत्यर्थे सिद्धे ज्ञातव्यं उषधीनां व्रीहियवादिरू-
पाणां कटित्वगम्यमानानां सर्वविधानां धन्यानां नाम येसपवत्तव उनमः श्रेष्ठोऽसि भवसि व्रीहिभिर्यजेत य
वैर्यजेत इत्येवमादिश्रुतिषु व्रीहीणां यवानामपि उभयीनामेवौषधीनां यागसाधनत्वस्य प्रसिद्धत्वं यतः
यत्त्वां वयं ऐच्छाम अभ्पलप्याम तेप्रतिस्पाशने शत्रूणां प्रतिबाधने अनितं प्रतिष्ठेकैं तिसमीयवतिं नमेव
तिंनमेव अविदाम अलभामहि स्पशा बाधने विठ्लाभे पतीयातु उभयत्र ज्ञातव्यो अनितमिति कंउ

उं॰
३०

सेतस्य स्थाने तेइत्येतत् ज्ञातव्यं तथोतमतेरुष्टांतद्वयमाह अनड्वान् जगतामिव व्याघ्रः श्वपदामिवेति जगतां
जंगमानां सर्वेषामपि भारवाहकानां मध्ये अनड्वानिव अनः शाकटं वहतीत्यनड्वान् रथवाहको बलीवर्द इ
व यथा तेषां मध्ये उत्तमः तथेति पुनः श्वापदां परप्राणवियोजनेन परमांसभक्षकाणां हिंस्रजंतूनां मध्ये
व्याघ्र इव यथा तेषां मध्ये उत्तमस्तथेति इति यद्वा सर्वे लिखितेषु उत्तो असवेषुकादिस्येवमादिषु अग्र
मेष्योषधीनां ततस्त्वमप्योषधे अपामार्गो अजायथाः इत्येवमादिष्वाथर्वणेषु ऋग्वेदिकेपि या ओषधीः
पूर्वाजाता इति सप्तर्षिसूक्ते प्रायः विशेषतोपि त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः उपस्तिरस्तु सोऽस्मा
स्माकं यो अस्माँ अभिदासति इत्येवमादिषु अपामार्गस्यैव ओषधिशब्दवाच्यत्वस्य प्रसिद्धत्वात् उत्तमो अस्योष
धीनामित्यनेनापि अपामार्ग एव दृष्टांत इति ज्ञातव्यं ॥ सपत्नहा व्याघ्रो भवत्यथो सिंहो अथो वृषा अथो सपत्न
कर्शनो यो बिभर्तीमं मणिं इति ९ यः कल्याणिं हिरण्यकामः इमं व्रीहियवादिरूपं मणिं बिभर्ति कंटकरक
षादिषु धारयति स इत्थं सपत्नव्याघ्रो भवति कल्याकारिणप्रतीत्यर्थे सिद्धं अथो अपि च यो बिभर्तीमं मणिं स
इत्थं सिंहो भवति यावत् अथो अपि च सपत्नहषां इंद्रो भवति इंद्रवद्देवं सपत्नाक्रमो भवति यावत्सर्वम्

अथोअपिच सपत्नकर्शनः सपत्नाञ्शत्रून्कर्शयति हंतीति सपत्नकर्शनः सोपिसएवभवतियोबिभर्तीमंम
णिं इति १२ नैनंघ्नंत्यप्सरसोनगंधर्वानमर्त्याः सर्वादिशोविराजतियोबिभर्तीमंमणिं इति १३ योबिभर्ती
मंमणिंएनंमणिधारयितारं अप्सरसोनघ्नंतिनहिंसंतिनगंधर्वाः गंधर्वाअपिनैनंघ्नंति नमर्त्याः मर्त्यामनु
ष्याअपिनैनंघ्नंति किंच योबिभर्तीमंमणिंससर्वादिशोविराजतिसर्वास्वपिदिक्षुविशेषेणादीप्यतेहिरण्यानि
हैरण्यजनितेनतेजसेतिभावः इति १४ कश्यपस्त्वामसृजतकश्यपस्त्वासमैरयत् अबिभस्त्वेंद्रोमानुषोबिभ्र
त्संश्रेषिणेऽजयत् मणिंसहस्रवीर्यंवर्मदेवाअकृण्वत इति १५ अत्रहेममणेरुत्पत्तिमहारोहेर्वेदयेत्तातव्यः
तथाहि हेममणेर्व्रीहियवादिरूपकश्यपःसृष्टिकर्ताश्रुतिस्मृत्यादिष्वतिप्रसिद्धऋषिस्त्वामसृजतसृष्टवान् सृ
ष्ट्यादौ सएवकश्यपः हेममणेत्वांसृष्ट्वातदर्थंसिद्धं पश्चात्समैरयत् अमन्त्र्यधारणार्थंप्रेरितवान् तदेवोत्तरेण
दर्शयन्नाह हेममणेइंद्रःसकलैश्वर्योपेतोदेवराजःत्वांत्वाअबिभः डुभृञ्धारणपोषणयोः धारितवान्हिरण्यानि
हैरण्यकामश्चेतियावत् अमन्त्र मानुषेमनुष्यलोकेहेममणेत्वांबिभ्रत् धारयमाणोयोनरोभवतिससंश्रेषिणे
संश्रेषःसंश्लेषःहननार्थंअतिसमीपवर्तिनंतद्धिघातेयस्यअसौसंश्रेषीतस्मैसंश्रेषिणेसंश्लेषिणेहननार्थंअ

निःसमीपवर्त्तिनोकृत्याकारिणेनरायश्चञ्जयत्जितवान् द्वितीयार्थेवर्त्तथीज्ञातया इतिपञ्चदशावृध्मह्मसहेत
ॐ· हेतमद्भावेनव्याख्येये तृतीयोप्यर्थवेः प्राकृतैः सहहेतमद्भावेनैवयोजनीयः तथाहि हेमणेपत्तांमानुषावि
३१ भुत्सेश्रावणेजयत्तमेववांमणिंसहस्रवीर्येसहस्रावायिकपराक्रमोपेतेदेवाःसर्वेपिवमेकवर्वेयंग्रकृएवतक्रत
वेतः इति १४ यस्ताहृत्ताभिर्येस्याद्दीत्ताभिर्यैस्तैर्यस्ताजिघांसति यस्मकमिदंतेजाद्दिवज्रेणशतपर्वेणा इति ५
यवैदेतिपदेवारहयेयोऽसं शुक्रोपजमानेप्रतिभुते हेइंद्रसकलैश्वर्योपेतास्मदीययजमान यः शत्रुः कृताभिः
त्वात्वांजिघांसति यस्सदीत्ताभिः यत्रसंबेपिनीभिर्दीत्ताभिःमेत्रदीत्ताभिर्वात्वाजिघांसति यश्चयत्नैः इत्युव
द्यौ श्यनाजिरोमृद्धांतकोदरपविशोषेक्रिदोमहःश्यनश्चाभिवरणीयाइत्येवमादिभिवरणीयेयैस्तैस्त्वांजिघां
सति इत्युक्तोथोत्तराद्धेवैनकृत्यानिर्हरणमेत्रप्रयोगवीर्येवलात्तस्मिन्नेतरिंद्रंसंवार्यतेनेंद्रेणसाकंग्रभेदमा
पन्नेनमेवकृत्याकारिवध्यंर्थेश्राशीदनिनप्रोत्साहयति तथाहि हेइंद्रसकलैश्वर्योपेतदेवराजत्वंयस्मकप्रतिकू
लोभूत्वाशतपर्वणावज्रेणतेकृत्याकारिणंजहीति इति १५ यपामिदंयतीवर्नेदेजसात्वंजयोमणिः यजांय
नेवरदत्तपरिपाणः समेशनः इति १६ यपामिदंत्रयमेवाहिपतीवर्नःप्रतिशत्रून्याति प्रतिकूलोभत्वावर्नेने ३१

इति प्रतीवर्त्तः ओजस्वान् शत्रुहननसामर्थ्योपेततेजस्वान् अत एव संजयः सम्यक्प्रकारेण जयति शत्रूनिति संज
यः अत एव परिपाणः परि सर्वतः पाति रक्षतीति परिपाणः सर्वतः पालयिता अत एव सुमंगलः शोभनानि मंग
लानि पुत्रादिविवाहादिरूपाणि यस्मात् सोयं सुमंगलः ईदृशो मणिः व्रीहियवादिः प्रागुक्तः प्रजापतिनेव रक्षतु पाल
यतु इति १९ असपत्नं नो अधराद् असपत्नं न उत्तरात् इंद्रासपत्नं नः पश्चाज्ज्योतिः शूर पुरस्कृधि इति १० हे इंद्र नो अस्मा
कं सपरिवाराणां अधरात् दक्षिणस्यां दिशि असपत्नं सपत्नाभावोस्तु तथा नो अस्माकं उत्तरात् उत्तरस्यां दिशि असपत्न
मस्तु तथैव नः पश्चात् पश्चिमस्यां दिशि असपत्नमस्तु हे शूर सकलशत्रुहननसमर्थ शौर्योपेत नः पुरः पूर्वस्यां
दिशि ज्योतिः शत्रुहननसमर्थं तेजः कृधि कुरु इति प्रार्थयामो वयमनेन कृत्यानिहरणमंत्रप्रयोगेण इति १०
शर्म मे द्यावापृथिवी शर्म द्यावापृथिवीप्रभृतीन् देवान् प्रार्थयते तथाहि द्यावापृथिवी द्यावापृथिव्यौ मे मम व
र्म कृत्यानिवारकं तेजो दधातु तथा अहः अहरभिमानी देवविशेषः मे वर्म दधातु प्रागवत् तथा सूर्यो मे वर्म
दधातु तथा इंद्रश्च इंद्रोपि मे वर्म दधातु तथा अग्निश्च अग्निरपि मे वर्म दधातु तथा धाता दधाति धारयति
सृष्टिमिति धाता सृष्टिकर्त्ता ब्रह्मापि मे मम वर्म कृत्यानिवारकं तेजो दधातु स्थापयतु इति प्रार्थयामो अनेन कृ

ॐ
३२

स्यानिर्हरणमंत्रप्रयोगेण इति १८ ऐंद्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नातिविध्यंति सर्वे तन्मे तन्वं त्रायतां सर्वतो बृह
दायुष्मान् जरदष्टिर्यथासानि इति १९ यत् उग्रं शत्रूणामसह्यं ऐंद्राग्नं इंद्राग्न्योः संबंधि बहुलं वर्म कृत्यानिवारकं ते
जःकर्मभूतं विश्वे विशंति प्रविशंति सर्वान् अर्थतः प्राणिनो यदेते विश्वे सर्वप्राणेषु प्रविष्टाः सर्वे पृथिव्यादयः पंचा
पि देवाः दीव्यंति क्रीडयंति सर्वप्राणिन इति देवाः सर्वप्राणिनां क्रीडयितारः चेष्टाकारकाः न अतिविध्यंति न अ
तिक्रम्य विध्यंति तन्न तदेव हृहत्त्वम ते उग्रं ऐंद्राग्नं बहुलं वर्म कवचं मम तन्वं शरीरं सर्वतः सर्वेषु देशेषु सर्वे
षु कालेषु च सर्वेभ्यः प्राणिभ्यश्च सर्वेभ्यः शत्रुप्रदिष्टेभ्यः कृत्यासामर्थ्येन अर्वेभ्यः बहुलादिभ्यश्च अशुभेभ्यः कृत्या
निर्हरणमंत्रप्रयोगेण त्रायतां पालयतु तथा यथा अहं जरदष्टिः जीर्णे बहुरीवापि अशुष्मान् आयुष्योपेतः
शतायुर्वै पुरुषः इत्युपेतया पिदीर्घायुष्योपेतः असानि भवेयं इति १९ आमारुहद्देवमणिर्मह्या अरिष्टतातये
इमं मेथिमभि संविशध्वं तनूपानं त्रिवरूथमोजसे इति २० उत राहं वैरं ममितिं दर्शनादयमितत्येलं बु तेनायं
कृत्यानिर्हरणे अति प्रसिद्धो देवमणिः देवानां अग्न्यादीनां संबंधी अग्न्यादिभिर्देवैरधिष्ठितः ईदृशो व्रीहियवादि :
केनादौ धार्यमाणो मणिः मह्यं मह्यं अरिष्टतातये अरिष्टस्य अरेषणस्य अहिंसनस्य परैः कृतस्य कृत्यादेरूप ३२

सहिंसनस्यसेवधिनोऽभावस्यतानेपि तनुविस्तारे विस्तारायविस्तरार्थंमामांश्रा अहृदत्तत्वाहृद्वान्
अयमर्थः अग्न्यादिभिर्देवैर्मणिरयंधिष्ठितः मणिनावाहमधिष्ठितः तेनपरहन्तेहन्माहृपंमहृयहिंसनेनतदा
भावस्यविस्तरः सुतरामपायमतइति अतोहेतोः त्रिवरूथेतिस्वएवदेवताः इतिमेनरित्वमुस्मानाअग्निर्वायुः
सूर्यइत्याद्यनेकश्रुतिनः त्रिवरूथंत्रीणिहर्म्याणिअंतरिक्षस्वर्गीहृपाणिवरूथानिगृहाणियस्मासौत्रिवरूथः
तंत्रिवरूथं वरूथं छर्दिः छादिः छाया वर्म अज्मेतिगृहाणि इतिगृहनामसुपाठात् इत्यमूतेलोकत्रय
गृहे अतएवतनूपान तनूः पातिपालयतिअस्मीनतनूपानः तेतनूपानेअस्माकंसपरिवाराणांशरीराणांपा
लयितारंइमेमामाहृदंमेधिं मेध्यतिआक्रोशकमेतियास्कः तेमेधिंशत्रूणामाक्रोशयितारंभवेतोनेनहन्ता
स्यानिहेरणमेत्रअपोरोणमपावस्यहेतवाःइत्येवंविधंआक्रोशंकुर्वाणंदेवमणिं ऐजसेहन्तानिहेरणस्वम
र्थतेजसेतदर्थंअभिअभिमत्वीभूपहेअग्न्यादयोदेवाप्यूयेसेविशेषेसेविहाभवथइतिप्रार्थयेहमनेनमेत्रअ
योरेण इति २ अस्मिंनिद्रोनिदभावनृत्वमिमेदेवासोअभिसेविश्वे दीर्घाउत्वायशतशारदायायुष्मा
नरदक्षितिपेयासतव इति २१ इंद्रःसकलेभ्यओपेतोदेवराजः अस्मिनूकंदाहोयरितेदेवमणेनृम्ह्यतेनिद

ॐ. ३३

पातनितरांधारयनस्थापयत अस्मे पुमन्ने इंद्रिये वसु अतिपननामस्वपादान किंच दीर्घायुत्वायदीर्घायुषाय
दीर्घायुष्यप्राप्तये तदेवविशदयति प्रातशारदायेति शारदिरोगबाहुल्येन प्रायोमरणंसंभाव्यते तेननतेनिवा
रयतिप्रातशारदाय शतशरत्संवत्सरंजीवनाय तदर्थंहेदेवासः अग्न्यादयोदेवाः इमंदेवमणिंअभिसंविशध्वं
मितिशेषवत् अथवत्वर्षपादेनापि आयुष्मन्तमेवाशास्यते तथाहि अहंजरदष्टिः जीर्णशरीरः यथाअसत्स्यां
भवेयंतथाआयुष्मान्दीर्घायुष्योपेतःस्यामिति ममजरांविनाकृतांजनितेअकालमरणंकदापिमास्तु क्रम
प्राप्ते शतायुर्वैपुरुषइति श्रुतिसिद्धंजरानंतरंमरणमास्त्विति भावः इति २१ स्वस्तिदाविशांपतिर्वृत्रहाविमृ
धोवशी इंद्रोवध्नातुतेमणिंजिगीवाँअपराजितः सोमपाअभयंकरोवृषा समारभन्तुसर्वतोदिवानक्तंचविश्व
तः इति २२ स्वस्तिदाअविनाशात्मकः विशांसकलप्रजानांपतिःपालकः वृत्रहासर्वडष्ठहंतापिसन् विमृधः
संग्रामरहितोविविधसंग्रामोवा वशीस्वाधीनवृत्तिः जिगीवान् शत्रुजयनाशकर्मा वृषासर्वकामानांसेक्ता
इत्येवंभूतोयइंद्रः सहेयजमानतेनवसर्वकामदंमणिंबध्नातु किंच सएवसर्वतस्मात्वारभन्त अस्मादरेण
एतेमेवार्थंपुनराह विश्वतः सर्वतः सर्वेषुदेशेषुसर्वेभ्यःशत्रुभ्योदिवादिवसेनक्तंचरात्रावपिएवंसर्वेष ३३

पिकालेषु त्वां रक्षतु इति प्रार्थयामी नेन क्रमान्निर्हरणमंत्रप्रयोगेण इति २२ इति श्रयं प्रतिसरः इति सरः इतिश्र
र्थे सूक्ताभिधेयं द्वाविंशर्चं सूक्तद्वयं व्याख्यातं इति श्रीद्विवेदश्रीश्रीयातिकानिवनतनयवामदेवविरचितायां कृता
निर्हरणसूक्तगणव्याख्यायां बालबोधदीपिकायां अथ अयं प्रतिसरः इति अर्थे सूक्ताभिधं द्वाविंशर्चं सूक्तद्वयं व्याख्या
तं समाप्तम् १ इति योऽकल्पयन्निर्व्याजेन प्रतिज्ञातानि निर्हृष्यां हृषिरसीन्यापि द्वेषापि कृत्यानिर्हरणसूक्तानि व्या
ख्यातानि अर्थशास्त्रमनेन व्याख्यातं --- न प्रतिज्ञातं क्रमप्राप्तं योऽकल्पयंतीत्यर्थे सूक्ताभिधेयं द्वात्रिंशदर्चं सूक्तद्वयं व्या
ख्यायते तत्र तावत् प्राचीनसूक्तकल्पोऽलिख्यते सयथा ॐ नमोऽथर्ववेदाय ब्रह्मलोके सुखासीनं सर्वलोक
गुरुं शिवं सर्ववेदमयं साक्षात्सर्वतेजोमयं परं सर्वविद्यापरं शश्वत् ज्ञानोपायास्मि वेहरं प्रणम्य सर्वे देवाश्च
ऋषयः समुपागताः वसिष्ठो वामदेवश्च जाबालिः कपिलस्तथा नारदश्च शुकः कण्वो विश्वामित्रश्च कश्यपः
अगस्त्यश्च पुलस्त्यश्च डवी मार्कण्डकादयः एवमादिमुनीश्रेण्यां हेदमब्रवीत् पितामहं पप्रच्छ वसुनिश्रेष्ठः शौ
नकः समहातपाः अथर्ववेदस्य महात्म्यं यथावद्वक्तुमर्हसि उवाच तस्मै देवेशो रहस्यं परमं शिवं सर्ववेदमयं
साक्षादथर्वणमिहोच्यते तदग्रं मंत्रभागेषु प्रत्यंगिरसमुच्यते पञ्चत्रिंशद्वचोक्ताः सर्वकार्यार्थसाधकाः

रा

ॐ
३५

गस्मादृग्रुत्तराः साक्षात्त्रैलोक्यविजयेपराः शिवेनोक्तामयालब्धाः समाहितमनाः शृणु शांतौ पुष्टौ समृद्धौ वम
श्यमृत्युभये तथा आभिचारिककर्माणि शांत्यादिग्रहनिग्रस्ताभिचारिके निग्रहानुग्रहे चैव सर्वपापहरे शुभे भूतप्रेत
पिशाचादिग्रहबाधनिवारणे गजाश्वयोः प्रशान्तिस्यात् राष्ट्रशांतिर्ज्वरापहे स्वदेशभ्रंशनाशने परचक्रभयाव
हे सर्वशत्रुक्षयकरे हस्तिस्तंभनिवारणे उत्पातशांतिर्देवानां कोपशांतिस्तथैव च ग्रहशांती रोगशांतिः कृत्याशा
न्तिस्तथैव च एवमादीनि कर्माणि सिध्यन्ति फलवंति च कुलहृदयविशुद्धात्मा मंत्रार्थे ज्ञानकोविदः शांतबुद्धिः प्र
सन्नात्मा जितक्रोधो जितेन्द्रियः दंभाहंकारमोहादिरहितो ज्ञानविक्रमः य[illegible]नयोगासनाहृष्टः सर्वाभीष्टप्रसाध
के मंत्रमार्गे समे लब्धास्यकः सर्वविजयी विनियोगमथो वक्ष्ये तत्त्रात्रिंशद्वर्णपरं प्रत्यंगिरानाम ऋषिश्छन्दो
नुष्टुप् प्रकीर्तितं उग्रावकृत्यादेवः स्यात् सर्वारिष्टविनाशनी विनियोगोऽत्र सर्वेषु कार्येषु वतथाविधः लक्षयेत्स
त्ययान्सर्वान्ब्राह्मणेनैव योजयेत् प्रयुक्तो ब्राह्मणे मंत्रो विपरीतफलप्रदः अथ प्रयोगः तत्रादौ प्राजापत्येन ब्र
ह्मकूर्चेन वा पंचगव्यादिना वा शरीरशुद्धिं संपाद्य हविष्याशी ब्रह्मचर्यादिकृतनियमः सन् कृस्नायुतजपान्मंत्र
सिद्धिर्भवति यां कल्पयंतीत्यादि भुजप्यमंत्रोनेकृत्यावैरम्रगृह्णाम्यांनमः पुनस्तमेव मंत्रं पठित्वा सिद्धवाहिनित ३५

ज्येनीभ्यांनमः पुनस्तमेवजन्यमंत्रंपठित्वामहाबलेमध्यमाभ्यांनमः पुनःपठित्वामहाभैरविघ्ननामिकाभ्यान
मः पुनर्मंत्रांतेसर्वेपरकृत्योच्छिदिनिकनिष्ठिकाभ्यांनमः पुनःषष्ठामाहृत्वौसर्वेपरमंत्रोच्छेदिनिकरतल
करपृष्ठाभ्यांनमः एकवैतस्यायवत्राहानैः एवंहृदयादिन्यासंकृत्वाततोध्यानमाचरेत् सिंहीसिंहसंस्थांवीम
र्वीभगवतःश्रोत्कृत्यनेत्रोज्वलांशूलखड्गकपालपाशडमरुचयायहस्तांभुजो दंष्ट्राकोटिविसंकटास्यकु
हरामारक्तनेत्रत्रयीबालेंदूज्ज्वलमौलिकांभगवतींप्रत्यंगिरांभावये ततोडगीगायत्रीजपेत् वार १० का
त्यायनैविद्महेकन्यकुमार्यैधीमहि तन्नोडगीप्रचोदयात् ततःस्वात्मरक्षांकुर्यात् तद्यथा योमइत्यादि
मन्त्राणांप्रत्यंगिराऋषिः अनुष्टुप्छंदः इंद्रादयोदेवताः आत्मरक्षार्थेविनियोगः योमेपूर्वेगतःपाप्मा
पापकेनेहकर्मणा इंद्रस्त्वंदेवोराजाजंभयतुस्तंभयतुस्तंभयतुशोषयतुमारयतुकलितस्मैप्रपद्यन्तु
स्वतेममशिवंममशुभंममशान्तिःस्वस्त्ययनंमम इंद्रायनमः इंद्रोमेदेवःप्रीतोभवतु १ योमेग्निगतः
पाप्मा अग्निस्त्वंदेवोराजा अग्नयेनमः अग्निर्मेदेवःप्रीतोभवतु २ योमेदक्षिणागतःपाप्मा यमस्त्वंदेवो
राजा यमायनमः यमोमेदेवःप्रीतोभवतु ३ योमेनिर्ऋतिगतःपाप्मानिर्ऋतिस्त्वंदेवोराजा निर्ऋतये

ॐ. नमः निर्ऋतिर्मेदेवःप्रीतोभवतु ४ योमेपश्चिमगतःपाप्मा॰ वरुणस्तंदेवोराजा वरुणायनमः वरुणोमे
देवःप्रीतोभवतु ५ योमेवायुगतःपाप्मा वायुस्तंदेवोराजा॰ वायवेनमः वायुर्मेदेवःप्रीतोभवतु ६ यो
३८ मउत्तरगतःपाप्मा सोमस्तंदेवोराजा सोमायनमः सोमोमेदेवःप्रीतोभवतु ७ योमईशानगतःपाप्मा
ईशानस्तंदेवोराजा ईशानायनमः ईशानोमेदेवःप्रीतोभवतु ८ योमब्रह्मगतःपाप्मा ब्रह्मातंदेवोराजा
ब्रह्मणेनमः ब्रह्मामेदेवःप्रीतोभवतु ९ योमेभूमिगतःपाप्मा॰ अग्निस्तंदेवोराजा अग्नयेनमः अग्निर्मेदेवः
प्रीतोभवतु १० योमआकाशगतःपाप्मा वायुस्तंदेवोराजा॰ वायवेनमः वायुर्मेदेवःप्रीतोभवतु ११ योमेन्त
रिक्षगतःपाप्मा द्यौस्तंदेवोराजा दिवेनमः द्यौर्मेदेवःप्रीतोभवतु १२ योमेसर्वगतःपाप्मा विश्वस्तंदेवोरा
जा विश्वेनमः विश्वेमेदेवःप्रीतोभवतु १३ एतैर्मन्त्रैरात्मरक्षांकुर्यात् ततस्ताम्रमयंमृन्मयंवाकलशंसं
स्थाप्यपयसाक्षीरेणवापूर्यशांत्यादिषु अत्राभिचारेषाङ्गेनपूरणं शत्रूणामभिचारेआयसःकलशःसार्षप
तैलेनपूरणं तत्रध्यानमयीवावर्णकमयीवाप्रतिमोविधायमहोपचारैःपूजयेत् शांत्यवोगिरसाउपचाराः
अभिचारेआसुराःउपचारा आयसीप्रतिमाविभीतकदारुमयीवाकुसवल्मीकमयीवाभवति राज्ञोकर्मे दधि ३८
तै

द्रजतं

एण स्नातः प्रत्यङ्मुखो वा कुर्यात् पलं तदर्द्धार्द्धमितं स्ववर्णं वा तगेणं स्याद्वशक्तौ शांत्यादिकार्येषु तयोरभावान्नाश्रे
णकुर्यात्तिमा गिरायाः आवाहनादिदत्तिणं तं महाराजोपचारैः संपूज्य ग्रहो रात्रमविच्छिन्नं गोघृतदीपं पुरतो व
स्थाप्य शांतिगणं पठेद्दारावं तेन वा अभिलिषितकामं मनसि विधाय मंत्रं सूक्तं वा गणं वा जपेत् तथा च गोपथब्राह्म
णे प्राङ्मुखो वा रपतो बहिः ष्णुपविश्य सहस्रकृत्व आवर्तयेत् तिं प्रतस्याथोः सर्वकर्माणि वे ति ब्राह्मणे तथा च कौ
शिकः सहस्रं हि गणहस्तौ मंत्रा हत्वो दश प्रयुक्तं सूक्तानाम प्रयुक्तं प्रोक्ता संख्यानादेशिकी विधौ सर्वारिष्टे तथा
पुष्पे भैषज्ये पौष्टिके विधौ मंत्रयोगः सम्प्रयुक्तः सर्वारिष्टनिवर्हणः महाव्याधौ महामायों वे व्याप्तत्वभिचारयोः प्र
योगो सूक्तमंत्राभ्यां तथा वाद्भुतदर्शने मंत्रसूक्तगणैः कार्यो गजकर्माभिचारिके असाध्यमपि यत्किंचित्साधयेद्विवि
धेकृते एकं द्वित्रीणि वा कुर्याद्बहु मिर्वदृढ याकृतं असकृत्क्रियमाणे हि दुःसाध्यमपि साधयेदिति योकल्पयेतौ
ति महामंत्रे सूक्तं वा शुक्लाष्टमीमारभ्य पर्वपर्यंतं डेंडं बदेंदं प्रत्यहं मात्रेषा रयन् शत्रुनाम संस्मरन् अष्टोत्तरसह
स्रं शतं वा प्रतिदिनं जपेत् पुरतो गिरायाः शत्रुर्महाग्रहग्रस्तो भवति कृष्णप्रतिपदमारभ्य चतुर्दशीपर्यंतं विभीतक
दंडमष्टप्रादेशमात्रमादाय शत्रुनामसंयुक्तं जपेन्महाव्याधिग्रहीतो म्रियते अर्कसमिधः कारस्करसमिधेवाभ

युक्तामिति पाठः पुस्तकान्तरे

ॐ
३८

ल्लातकसमिधो वा तैलाभ्यक्ताः अष्टोत्तरसहस्रं हुत्वा सप्तरात्रेण शत्रुक्षयो भवति केवलजपान्मासेन ग्रामाभिभूतो भ
वति मासेनाम्रियते ईश्वरालये श्मशानकाष्ठमष्टाङ्गुलं पत्रे शत्रुनामसंपुटकं मन्त्रं लिखित्वाष्टोत्तरसहस्रं जपि
त्वा प्रादेशमात्रे भस्मनि निखनेत् तत्क्षणाद्देवग्रामाभिभूतो म्रियते न कुलक्षयश्च भवति पापक्षयकामस्तु जलेना
भिद्रं जपेत् समस्तमहापातकोपपातकैः प्रमुच्यते ॐ उडुम्बरपत्रसपवित्रं सोदकं अपामार्गसहितं स्पर्शयन्नष्टाधिक
सहस्रं त्रिरात्रे पञ्चरात्रे सप्तरात्रे वा जपेत् सर्वकृत्यां निवारयति तेनोदकेन कृत्या गृहं गृहीतमवसिञ्चति सर्वकृत्या
निवारयति तेनैवोदकेन गृहं देवं वाप्लावयति चौरव्याघ्रादिभयं न पश्यति तेनैव मन्त्रेण गवां गजकन्या भूतप्रेता॰॰ वि
ल्वाग्रत्रगुग्गुलसर्षपकर्पासबीजकरवीरपुष्पैर्होमः घृतहरिद्रान्नतुषलवणैश्च हिरण्यं दक्षिणा तृतीयामृचं
जपन् ब्रह्मीभूत् इन्द्रराजब्रह्मकृत्याः निवर्तयति अक्षतैस्तिलैर्होमः अङ्गुलीयकं दक्षिणा चतुर्थीमृचं जपन्सर्वदेवकृत्सर्वकृ
त्या दूषयति अपामार्गसमिद्भिर्होमः हिरण्यं दक्षिणा पञ्चमीं जपतः शत्रुक्षयो भवति भिल्लातकसमिद्भिः सार्षप
तैलाक्ताभिर्होमः महिषी दक्षिणा षष्ठीं जपन् कृत्याकृतं विदारयति अभिचारशान्तिश्च तिलैर्होमः सुवर्णं द
क्षिणा यस्मो वाव परेहीति जपतः द्वादशरात्रं जपेत् कल्पगणान्वारयति देवताश्चापि तर्पयति तिलमाषहोमः द ३८

शत्वान्मोचयति प्रथमामृचं जपन् कपिलाक्षीरचरुं संपात्याभिमंत्र्य प्राश्नतमतीशादेश्यायेद्दीर्घायुष्यं पुत्रं जनयति
पालाशसमिद्भिः दधिमधुघृताक्ताभिरष्टसहस्रं जुहूयात् समभिर्दिवसैः ग्रहदोषान् शमयति अभिचारशांति
र्भवति विस्वर्गृहे जपन्नष्टसिद्धिर्भवति अयुतं जपन् परकृत्योच्छेदनं करोति दशायुतं जपन् स्वपरकृत्योच्छे
दो भवति यो कल्पयेन्नीति प्रथमामृचं सूर्वे पद्भ्यशतिपदमारभ्य तत्सर्वं पर्यंतं ताम्रपात्रे पंचगव्येन पूरिते संस्पृश्य
नाष्टाधिकमयुतमेकं प्रतिदिनं जपेयुः अष्टाधिकसहस्रं वा कपिलाक्षीरचरुं हविष्यं वा भेजानाः महाकृत्या
भ्रमरीः ... श्रोगि ... कृत्यास्वपरस्त्रीशूद्रकृतादिवधुरुषामराघभिचार ... सर्वकृत्यानि वारयेयुः अप
स्मृत्युभूतप्रेतपिशाचादिब्रह्मराक्षसयक्षगंधर्वविद्याधरस्कंदग्रहापस्मारादिसमस्तबाधा निवारयंति सर्वरो
गान्नाशयंति उत्तरोत्तरमहावृद्धिः सर्वशांतिश्च भवति शालितंडुलान्नाज्याक्तान्नित्यमष्टसहस्रं जुहूयात् सर्व
व्याधिनिवारणं भवति ग्रहग्रहः श्रीर्वर्द्धते सर्वत्वद्बाधनं शमयंति तिलमाषचरुं माज्येनाक्तमष्टसहस्रं जुहू
यान्महाभिचारशांतिर्भवति तिलतंडुलैर्ब्रह्मवृक्षसमिद्भिर्वाल्याक्तैर्मासमेकं महोत्तरसहस्रं हुत्वा सकला
व्याधिदुःखं हरंति महोत्पातशांतिर्भवति वर्षशतं जीवंति कृवलवर्द्धयेद्दक्षिणा ग्रामो वासीरवा श्रीः सर्वो

डॆ. ३८

[illegible]मादितीयामेवं जपन्कृत्वा कृत्यानिवशयति बिल्वपत्रगुग्गुलसर्षपकर्पासबीजकवीरपुष्पैर्होमः घृतहारि
द्रेतत्सूर्णं लवणं च हिरण्यं दक्षिणा तृतीयामेवं जपन्स्त्रीशूद्रराजब्रह्मकृत्याः निवर्त्तयति अघृतैस्तिलैर्होमः
अंगुलीयकं दक्षिणा चतुर्थीमेवं जपन्सर्वं वत्सर्वं कृत्वा दूषयति अपामार्गसमिद्भिर्होमः हिरण्यं दक्षिणा पं
चमीं जपतः शत्रुक्षयो भवति भिल्लातकसमिद्भिः सार्षपतैलाभ्यक्ताभिर्होमः महिषी दक्षिणा षष्ठीं जपन्कृ
त्याकृते विदारयति अभिचारशांतिश्च तिलैर्होमः सुवर्णं दक्षिणा सप्तम्या वायपरे हीतिवतस्वः द्वादशरात्रं ज
पेत् ब्राह्मणान्वारयति देवतानपि क्षयति तिलमाषहोमः दश गावो दक्षिणा अष्टमीं पितृस्य इति दर्शं एवं जपेत्
यतः कृत्यानतः गच्छति कृत्याकृतारं भक्षयति गजवाजिपशूनां शांतिर्भवति पालाशसमिद्भिस्तिलैर्वा
होमः दशगावो दक्षिणा नवमीमिति वतस्वः सर्वं वशयति स्तंभयति कृत्या अपमृत्युं जयति तिलतंडुलैर्घृ
ताक्तैर्होमः अश्वो दक्षिणा सुवर्णानि पंच च अभ्यकाकेनाम एवं नित्यमष्टाधिकसहस्रं जपेत् सर्वशत्रुक्षयो
भवति सर्वकृत्याप्रशांतिर्भवति सर्वलोकवशमानयति रुद्रालये सहस्रं जपेत् सर्वव्याधिगृहीतशत्रुर्भवति
लवणकार्पासबीजाभ्यां घृताक्ताभ्यामष्टसहस्रं जुहुयात् सूर्याभिमुखो ष्टाधिकशतं जपेत् महाहिस्तंभो ३८

भवति समुद्रमपि शोषयति पंचपलानि हिरण्यं दक्षिणा श्रीः योकल्पयेत्सर्वसूक्तेनु द्वात्रिंशद्गात्मकेन शत
वेश्वाहुतेन तिलतंडुलानाज्याक्तानष्टोत्तरशतं जुहुयात् मासेन महाश्रियं भवति एतेनैव सूक्तेन रजतदूर्वागव्यं
हुते अष्टोत्तरशताहुति प्रत्यहं जन्मदिने जुहुयात् महामृत्युमपि जयति सर्वपापक्षयश्च भवति जानुदघ्ने जले ज
पतोभिचारशांतिर्ग्रहशांतिश्च भवति कुंकुमकर्पूरचंदने पुरतः संस्थाप्याष्टसहस्रं जप्त्वा कुंभेनाभिषिंचेत् अभिचा
रकृत्यां नाशयति ग्रहदोषान्नश्यंति भूतप्रेतपिशाचापस्मारादयो नश्यंति वंध्या पुत्रं लभते कुमारी पतिं कन्यार्थी
कन्यां लभते नाभिमात्रे जले स्थितोदयात्समयपर्यंतं जपेत्सहस्रं सप्तदिनादर्वाक् महावृष्टिर्भवति वंजुलसमि
द्भिः पयसाक्ताभिरष्टसहस्रं जुहुयात् महावृष्टिर्भवति लवणेन वृष्टिस्तंभश्च अनेनैव सूक्तेन स्वयंभूलिंगम
हारुद्रं कृत्वा शुद्धतोयेनाभिषेकं कुर्यात् समाहावृष्टिर्भवति ज्वरदाहपीडोपशमनं जायते शनैश्चरे स्वमह
दे संस्थाप्य जपेत् आयुरारोग्यमैश्वर्यं भवति ग्रहाणामानुकूल्यं च जायते वर्षशतं जीवति शतं सहस्रमयुतं
गणेशसूक्तेन तथा मणौ शौनकादिभिराचार्यैर्होमसंख्योपपादिता मंत्रेण कार्यसिद्धिर्या जायते तार्थिनां नृणां
तस्मात्कृतगणासिद्धिर्जायते सूक्तयोगतः सहस्रे गणितासिद्धिर्जायते गणयोगतः गणेन द्विकृते कर्मैसर्वे

ॐ सिद्धिकरं भवेत् तथा चायं गणः हृष्यामृषिरसि ईशानोत्वा समं ओतिहृतोऽसि ये पुरस्तात्त्वा सस्तायां तेवक्रुः प्रतीचीन
३५ फलोऽयं प्रतिसरो मणिर्यो कल्पयंतीति कृत्याप्रतिहरणानि सर्वेषां कृत्याप्रतिहरणसूक्तानां प्रत्येकं स्वस्वकल्पे वि
धानं स्पष्टमेव कथ्यते गणास्तु अयं चायं जपे होमे तु समं भवेत् सहस्रं हि जपे संख्या होमसंख्या शतं भवेत् वि
शेषोऽयं गणस्योक्तः सन्न्यस्तस्सर्वो हि प्रवेवत् अवब्रह्मेत्यथर्वा ऋषिः एकपदा गायत्री छंदः उग्रकृत्या देवता ब्रू
मिति बीजं अमिति शक्तिः उमिति कीलकं मम वक्तविंयपुरुषार्थे जपे विनियोगः मंत्रः अवब्रस्ताद्विषो जहि
अवब्रह्मेति पादे शुचिर्भूत्वा त्रिसहस्रं त्रिपलं तं जपेत् सर्वपापैः प्रमुच्यते सर्वशुभमवाप्नोति सर्वान्शत्रून्जयति अ
नेनान्नमभिमृश्य भुंजीत सर्वविषमपहंति जितेन्द्रियो हविष्याशी लक्षं जपेद् दिष्टं महासिद्धिर्भवति समाहितमना भू
त्वा लक्षं जपेत् सर्वकृत्योच्छेदः शतमरोगमायुरवाप्नोति हूर्वयापि वा मृतसंजुक्रयालक्षं होति मृतोऽपि उदयति राज
यक्ष्मादयो रोगा विलयं यान्ति कालज्वर महाज्वर शीतज्वर सर्वज्वर निवृत्तिर्भवति महादाहोपशांतिर्भवति
भूतप्रेतपिशाचादिबाधान् शमयति दृष्टिदोषान् शमयति लक्षतिलहोमे महापातकप्रायश्चित्तं भवति यथ तमंत्रेद
शलक्षं जपे दशांशेन होमं कुर्यात् अष्टौ महासिद्धयो भवन्ति इन्द्रादीन् वशयति यं यं काममपेक्षते तं तमाप्नोति य ३५

एतेमंत्रेजपेत्कृतलदेवब्रह्मपरोक्षेभवतिब्रह्मपरोक्षेभवतीत्याहतः पैप्पलादशौनकौमंत्रसकृगणजपेषुश्रावयेतयो :
शांतिपठेत् सर्वत्रजपहोमांतेस्तोत्रमंत्रेणभगवतीप्रत्यंगिरांपुष्पांजलिनाप्रजयेत् तथाचस्तोत्रे अथप्रत्यंगिरा
स्तोत्रमंत्रस्यांगिराऋषिरनुष्टुप्छंदः प्रत्यंगिरादेवता स्तुतौविनियोगः ॐक्रांनमः अंगुष्ठाभ्यांनमः ॐक्रींनमः
तर्जनीभ्यांनमः ॐक्रूंनमः मध्यमाभ्यांनमः ॐक्रैंनमः अनामिकाभ्यांनमः ॐक्रौंनमः कनिष्ठिकाभ्यांनमः
ॐक्रः नमः करतलकरपृष्ठाभ्यांनमः एवंहृदयादि अथस्तोत्रध्यानम् कस्त्रीवसर्गोहृहद्दयाररक्तकुंचितमूर्द्धजा शिवः
कपालमालाचविकेशीज्ज्वलितानना रक्तनेत्रामतिक्रुद्धालंबजिह्वामयोमावी दंष्ट्राकरालवदनानेत्रभ्रुकुटिले
क्षणा उर्द्धदक्षिणहस्तेनबिभ्रतीचपरश्वधं अथोदक्षिणहस्तेनबिभ्राणांशूलमद्भुतं तथोर्द्ध्ववामहस्तेनधारयंती
तथांकुशं अधोवामकरेणाथबिभ्राणांपाशमेवच एवंध्यात्वामहाकृत्यांस्तोत्रमेनमुदीरयेत् तथाहि ईश्वरोवा
च नमः प्रत्यंगिरेदेविप्रतिकूलान्विध्वंसिनि नमः सर्वगतेशांतेपरचक्रावमर्दिनी नमः सर्वप्रदेसौम्येपरचेत
विदारिणि नमोजगत्त्रयाधारेपरमंत्रविदारिणि नमः पटलरेसौम्येपरतंत्रप्रकाशिनि नमः कालिमहा
स्माक्षिअभेदेहविदारिणि नमस्तेचंडिकेचंडिमहामहिषमारिणि नमोब्रह्माणिदेवेशिरक्तबीजनिपातिनि

ॐ ५०

नमः पैमारिवैकुंठिहृदपीनिशारिति नमोवाराहिवैंद्राणिपरेनिर्वाणदायिनि नमस्तेदेविचामुंडिचंडमुंडविदारिणि
नमोमातर्महालक्ष्मिसंसारार्णवतारिणि निशुंभदैत्यसंहारिकालांतकिनमोस्तुते एकादशपुष्पांजलिं ॐ नमः कु
सुमवरशोभिते सकलसेवकजनोपद्रवकारककुष्टग्रहगजघंटासंघट्टसंहारिणि अनेकसिंहकोटिचारिणिका
लांतकिनमोस्तुते द्वितीयांजलिः दुर्गेसहस्रवदने ऽष्टादशभुजलताकर्षितेमहाबलपराक्रमे ऽत्यद्भुते ऽप
राजितेदेविप्रत्यंगिरः सर्वातिशायिनि परकर्मविध्वंसिनि परयंत्रमंत्रतंत्रचूर्णादिप्रयोगकृतवशीकरणस्तंभन
जृंभणादिकदोषान्निवर्याक्रोधिनि सर्वशत्रूच्चाटिनि मारिणि मोहिनि वशीकरणि स्तंभिनि जृंभिणि पाकर्षिणि बंध
कारिणि सर्वदेवताग्रहयोगग्रहयोगिनीग्रहदानवग्रहदैत्यग्रहराक्षसग्रहब्रह्मराक्षसग्रहसिद्धग्रहयक्षग्रहगु
ह्यकग्रहविद्याधरग्रहकिंनरग्रहगंधर्वग्रहाप्सरोग्रहभूतग्रहप्रेतग्रहपिशाचग्रहकूष्मांडग्रहगजादिकग्रहभूत
[illegible]कग्रहदैमनग्रहमातृग्रहपितृग्रहवेतालग्रहशाक्रग्रहराजग्रहचोरग्रहगात्रग्रहाश्वदेवताग्रहगो
त्रदेवताग्रह[illegible]ग्रहव्याधिग्रहापस्मारग्रहनाकग्रहगलग्रहालकग्रहयाम्यग्रहडामरिकाग्रहोदकग्रहविषार
ग्रहरात्रिग्रह[illegible]छायाग्रहपाल्यग्रहसर्पग्रह[illegible]शाल्यग्रहकालग्रहसर्वदोषग्रहविद्राविणि सर्वदुष्टभक्षिणि ४

50

सर्वपापनिषूदिनि सर्वयंत्रस्फोटिनि सर्वशृंखलात्रोटिनि सर्वमुद्राविदारिणि ज्वालाजिह्वे विकरालवक्त्रे रौद्रम्
तैं देवि प्रत्यंगिरः सर्वं देहि यशो देहि पुत्रान्देह्यारोग्यं देहि भक्तिमुक्त्यादिकं देहि सर्वसिद्धिं देहि मम सपरिवारं त
रक्षाजपहोमध्यानार्चनादिकं कृतं न्यूनमधिकं वापरिपूर्णं कुरु कुरु स्वभिमुखीभव भव त्वं मम सापराधं
तृतीयापुष्पांजलिः एवं स्तुता महालक्ष्मीः शिवेन परमात्मना उवाचेदं प्रहृष्टांगी शृणुष्व परमेश्वर एतत्प्र
त्यंगिरास्तोत्रं ये पठंति द्विजोत्तमा शृण्वंतः साधयंतश्च तेषां सिद्धिप्रदा भवेत् श्रीभद्रकाली महाकाली कालिका
गुह्यकालिका त्रिपुरा त्वरिता नित्या त्रैलोक्यविजया जया जिता पराजिता देवी जयंती भद्रकालिका सिद्ध
लक्ष्मी महालक्ष्मीः कालरात्रि नमोस्तु ते चतुर्थीपुष्पांजलिः कालीकरालविक्रांते कालिके पापहारि
णि विकरालमुखे देवि ज्वालामुखि नमोस्तु ते पंचमीपुष्पांजलिः एकैकं पुष्पांजलीन्प्रत्यंगिरायै निवेद
येत् तद्घोरा हृणी महद् इति सर्वे हृदयमंत्रा लम्पदशावारं जपति ॐ शांतिः शांतिः शांतिः श्रीः सत्वयप्रत्यं
गिरामहामंत्रप्रयोगस्तु उभयकुलविशुद्धेन विप्राश्रिताः पूर्वं विदिवकर्मयोनान्यत् यदि कश्चिदनर्थवं विदन्नाना
त्यमाद्दाल्लोभाद्वा द्विजः प्रत्यंगिराप्रयोगं कुर्यात् तदा प्रत्यंगिरा निःफला भवति विपरीतफलदा ना जायते स

ग=४

नर्यैर्वैविद्याज्ञानिनोप्यत्रानधिकारात् अथर्ववेदिदआथर्वणमेव संस्कारवन्तं स्कृतस्येवाधिकारात् तथा च श्रुतिर्गोपथब्राह्मणे
ॐ. यत्र स्माद्यासः श्रोवा च भृगवाङ्गिरोविदा संस्कृतो न्यान्वेदानधीयीत नाम्यत्र संस्कृतो भृग्वङ्गिरसोधीयीतेति तथा च परिशिष्ट
४२ कल्पे अपि तात यथा बालस्तथा सोवत्सरो नृपः अमात्यको यथा बालस्तथाथर्वविवर्जितः येमेण पृथिवीं कृत्स्नां वि
जयिष्यन्महीपतिः विद्यालतं संपन्नं भार्गवं वरयेद्गुरुं अथर्वभिर्न्यवत्तोतेतत्कोतेनेतरैस्त्रिभिः विज्ञानत्रिषु लोकेषु जा
यते ब्रह्मवेदतः अथर्वा सृजते घोरमद्भुतं शमयेत्तथा अथर्वा रक्षते यज्ञं यज्ञस्य पतिरंगिराः दिव्यान्तरिक्षभौमानामुत्पा
तानामनेकधा शमयिता ब्रह्मवेदज्ञस्तस्मादाथर्वणो गुरुः सेतायारक्षणे तस्मात्स्वाराष्ट्रपरिवृद्धये शांत्यर्थं च महीपा
लो हणयाङ्गार्गवं गुरुं न हविः प्रतिगृह्णाति देवताः पितरो द्विजाः तस्य भूमिपतेर्यस्य गृहे नाथर्वविद्गुरुः अथर्वण उ
द्रतेनान्ये नियोज्योथर्वविद्गुरुः नृपेण जयकामेन निर्मितो क्रिविवाधरे बहृवोहेति वे राष्ट्रमद्भुपे नाशयेत्ततान्
छंदोगो यतनाशाय तस्मादाथर्वणो गुरुः अज्ञानाद्वा प्रमादाद्वा यस्य स्याद्बह्वृचो गुरुः देशराष्ट्रपुरामात्यनाशस्तस्य
न संशयः यदि वाध्वर्यवं राजा नियुनक्ति पुरोहितं शस्त्रेण वध्यते क्षिप्रं परिक्षीणार्थवाहनः यथैव पंगुरध्वानम
पक्षी वांडभोजनः एवं छंदोगगुरुणा राजा वृद्धिं न गच्छति पलाल्लकमिदं सर्वं भृग्पज्जः सामसंस्थिते सारे सारपरे ४२

यन्नमथर्वांगिरसोविदुः नतिथिर्नैवनक्षत्रंनग्रहोनचचंद्रमाः अथर्वमंत्राः संप्राप्ताः सर्वसिद्धिर्भविष्यति सर्व
सिद्धिर्भविष्यतीति इत्याथर्वणेशौनकीयःप्रत्यंगिराकल्पः समाप्तः अथहोमविधिः आचमनेप्राणायामः
संकल्पः स्वस्त्ययने आज्यभागांतेपूर्ववत्तंत्रंकृत्वाततः शांत्युदकंकुर्यात् तत्रचातनकृत्याप्रतिहरणयोरावयः
ततःयन्नातल्ली शांत्युदकेअपामार्गमहौषधीप्रक्षेपः तेनोदकेनत्रिरेवाग्निंसंप्रोक्ष्यत्रिःपर्युक्षतित्रिः
कारयमाणमाचामयतिचसंप्रोक्षतिचयत्रवास्तुचसंप्रोक्षतितन्महौषधीमूलमंत्रेणसंपात्याभिमंत्र्यबधी
यात् ततः सर्वदोषोपशांतिर्भवति ततःप्रधानहोमः ततःउत्तरतंत्रं यथाशक्तिब्राह्मणभोजनम्
नवकुमार्यश्चभोजयेत् इतिहोमविधिः ॥